Shri Raghunatha Temple MSS. Library,
JAMMU

No. ६६० - घ

Title गायत्री मंत्र व्याख्या

Author विद्यारण्यमुनिः

Extent १ Age

Subject भक्तिशास्त्रम् · संपूर्णम्

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नं० ९६० - घ

**गायत्रीमंत्रव्याख्या** (भक्तिशास्त्रम)

नं० ९६० - घ

(भक्तिशास्त्रम संपूर्णम)

पत्रम १म (सम्पूर्णम)

कर्त्ता विद्यारण्य मुनिः

लिपिका शिवरामः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नं० ६६० - घ

गायत्री मंत्र व्याख्या (भक्तिशास्त्रम्)

पत्रम् १ म् (सम्पूर्णम्)

(भक्तिशास्त्रम्) (संपूर्णम्)

कर्त्ता विद्यारण्यमुनिः

लिपिक; शिवरामः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

श्रीगणेशाय नमः ॥ अथ श्रीविद्यारण्यस्वामिभिः सर्ववेदात्मनः सर्वशक्तेः सर्वभासकतेजोमयस्य परमात्मनः सर्वात्म
कत्वद्योतनार्थं सर्वात्मकब्रह्मप्रतिपादकः गायत्रीमंत्रः सोपादानप्रकारः प्रकाश्यते तत्र गायत्रीं प्रणवादिसमा
व्याहृत्युपेतां सशिरोमंत्रां सर्ववेदसारमिति वदंति एवं विशिष्टां गायत्रीं प्राणायामैरुपास्यास प्रणवव्याहृतित्रयोपेता
गायत्री जपादिभिरुपास्या अत्र शुद्धगायत्री प्रत्यग्ब्रह्मैक्यबोधिका धियो यो नः प्रचोदयादिति नः अस्माकं
धियः बुद्धीः प्रचोदयात् प्रेरयेत् बुद्धिप्रकाशकः सर्वसाक्षी प्रत्यगात्मा उच्यते तस्य प्रतीचः स्वरूपभूतं ब्रह्म त
त्सवितुरिति पदेन निर्दिश्यते तत्र ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृत इति तच्छब्देन प्रत्यग्भूतं स्वतः सिद्धं
परब्रह्मोच्यते सवितुरिति स्थितिलयोपलक्षणं सर्वप्रपंचोपादानत्वलक्षणं समस्तद्वैतभ्रमाधिष्ठानत्वलक्ष्य
ते वरेण्यमिति सर्ववरेण्यं निरतिशयानंदरूपम् भर्ग इति निन्द्यादिदोषभर्जनात्मकज्ञानैकविषयत्वं देवस्य इ
९६ ति सर्वद्योतनात्मकअखंडचिदानंदरसत्वं सवितुर्देवस्येति षष्ठ्यर्थः राहोः शिर इतिवदौपचारिकः बुद्ध्यादिसर्व
साक्षिलक्षणं यन्मे स्वरूपं तन्निरधिष्ठानभूतपरमानंदनिरस्तानर्थस्वरूपप्रकाशकचिदात्मकं ब्रह्मैवेत्येवं धीमहि
एवं सति ब्रह्मणः स्वविवर्तजडप्रपंचेन अपवादसामानाधिकरण्यरूपेणैक्यमिति ज्ञानेन सर्वसाक्षिप्रत्यगा
त्मनो ब्रह्मणा सह तादात्म्यानुरूपमैक्यं भवति सर्वात्मकब्रह्मबोधको यं गायत्रीमंत्रः संपद्यते समस्तव्याहृतीनां
मप्ययमर्थः भूरिति सन्मात्रमुच्यते भुव इति सर्वं भावयतीति व्युत्पत्त्या चिद्रूपमुच्यते स्वरिति सुवतीति व्यु
त्पत्त्या सर्वैः सुप्रसवैः सर्वैः प्रीयमाणसुखरूपमुच्यते मह इति महत्यते पूज्यत इति व्युत्पत्त्या सर्वातिशयत्वमुच्य
ते जन इति जनयतीति सर्वकारणत्वमुच्यते तप इति तेजोरूपत्वं सत्यमिति सर्वबाधरहितत्वमुच्यते एतदु
भयं भवति लोके यस्य रूपं तदेव कारणत्वम् [illegible] रूपं यन्न स्वाधिकं यन्न स्वाधिकरणं येन (

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata initiative

ज्योतीरूपं यस्य यथार्थरूपं तदोंकारवाच्यम ब्रह्मैव तस्यापि चिद्रूपा भा वाहितिति व्याहृतयोपि सर्वात्मक ब्रह्म बोधकाभावं नी
ति यद्वाम्नृतायास्य स्व भूर्लोकाः ओंकारवाच्यब्रह्मात्मकाः न तद्व्यतिरिक्तं किंचिदस्तीति गायत्रीशिरसो ऽयमर्थः आ
पऽति व्याप्नोतिव्यापित्वमुच्यते ज्योतिरिति प्रकाशरूपं रसइति सर्वोतिशायत्वं अमृतमिति मरणादिसं
सारनिर्मुक्तत्वं ब्रह्मेत्यात्मा उच्यते एवं सर्वव्यापि सर्वप्रकाशं सर्वोतिशायं नित्यमुक्तम् आत्मस्वरूपं सच्चि
दानंदात्मकं यदोंकारवाच्यं ब्रह्म तदहमस्मीति गायत्रीशिरोपि सर्वात्मकबोधक ब्रह्मव्याहृतित्रयरूपेण शिरः
प्राणं प्रतिमद्द पुः सवलं यद्विराड्वाक्येन तस्या ध्यान गतं पुनः १ सूर्योपजीव्यं यत्तेजो भर्गः संहारमर्जकम सुद्ध्या
दिप्रेरकं यत्त्रतस्य देवस्य धीमहि २ अखंडैकरसं ब्रह्म सच्चिन्म विन्दुखात्मकमसत्यं तदहमेवास्मीत्यनवे।
त्वमनुस्मर- ३ येनेके न विजानाति नानार्थं चतुरादिभिः प्रतीतिरूपं सर्वत्र तदनुस्मर नित्यशः ४ द्रष्टृ दर्श
न दृश्यानां यदनुस्यूतमंतरा दिग्द्रष्टृ त्वमसमाभिधिरं भावयबुद्धिमन् ५ सत्याश्रयं विनासत्यं स्यादव
स्थानकुत्रचित् येनावभासते सत्यंसत्यं तदहमेवहि ६ ॥ इति श्री विद्यारण्यमुनिवर्यकृतगायत्रीव्या
ख्यासमाप्ता ॥ ॐ ॥ शिवरामः ॥ ॐ ॥ राम ॥ ॐ ॥ शिव ॥ ॐ ॥ ॐ ॥ ॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative